SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# हास्यरसविचारे जयदेव-श्रीकेशवमिश्रयोः अभिमतम्

**Satyen Shit**
Research Scholar, Dept. of Sanskrit
Vidyasagar University, Midnapore,
Paschim Medinipur, West Bengal, India
Email: satyenshit22@gmail.com

**Abstract:** संस्कृतसाहित्ये सर्वाधिकं जनप्रियम् अङ्गं हि रसतत्त्वम्। यस्य चर्चा सर्वैः आलङ्कारिकैः कृता। आलङ्कारिकाणां मध्ये रससंख्याविषये मतभेदो दृश्यते । यथा – कैश्चन अष्टौ रसाः, कैश्चन नव रसाः, कैश्चन दश रसाः इति मन्यन्ते। परन्तु सर्वे आलङ्कारिकाः हास्यरसविषये आलोचितवन्तः। मम शोधप्रबन्धे द्वौ आलङ्कारिकौ विद्येते। यथा- एको हि द्वादशशतकस्य आलङ्कारिको जयदेवाचार्यः। यस्य अलङ्कारग्रन्थस्तु चन्द्रालोकः। अपरस्तु षोडशशतकस्य आलङ्कारिकः श्रीकेशवमिश्रः। यस्य अलङ्कारग्रन्थो हि अलङ्कारशेखरः। अस्य रसस्य प्रयोजनीयता किं पीयूषवर्षश्रीजयदेवाचार्य-श्रीकेशवमिश्रयोः मतानुसारम्? अपि च कस्य मतम् अधिकग्रहणयोग्यमिति मम शोधकार्यस्य मुख्यो विषयः।

**Keywords:** संस्कृतसाहित्यम्, सहृदयः, रसः, हास्यरसः, श्रीकेशवमिश्रः, जयदेवाचार्यः, स्थायिभावः, हासः, आलङ्कारिकः।

**भूमिका—**

"यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।। "[1]

यः आस्वादितो भूत्वा सामाजिकगणानां चित्ते आनन्दस्य जनको भवति स हि रसः। अतः तैत्तिरीयोपनिषदि उक्तम्–

"रसो वै सः। रसं ह्येवयां लब्ध्वाहऽनन्दी भवति। को ह्येवान्यात् कः प्राणाद् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।"[2]

अर्थात्, परमब्रह्मपरमात्मना सुकृतेन कथितं यत्, सैव सत्यमेव रसस्वरूपः आनन्दमयो वा भवति, यः वास्तविकः आनन्दमयः। कारणं अनादिकालात् जन्म-मृत्युरूपदुःखभोगकारी जीवात्मा रसमयं परब्रह्म लब्ध्वा आनन्दितो भवति। यावत् पर्यन्तं परमानन्दस्वरूपं परमेश्वरं न लभते , तावत् पर्यन्तं जीवात्मा कदापि पूर्णानन्दं नित्यानन्दम् अखण्डानन्दम् अनन्तानन्दं न लप्स्यते। एतेन रसस्वरूपस्य मध्ये निःसन्देहेन आनन्दस्वरूपेण परमात्मनः अस्तित्वं सिध्यति। अनेन परमात्मरूपरसस्वादनेन अद्यापि प्राणीकुलस्य अस्तित्वं तिष्ठति। आचार्येण अभिगुप्तेन लोचनटीकायां स्वसंविदानन्दस्य आस्वादनमेव रसः इति उक्तः–

"शब्दसमर्प्यमानहृदयसंवादसुन्दरविभावानुभावसमुचितप्रग्विनिविष्टरत्यादिवासनानुरागसुकुमार-स्वसंविदानन्दचर्वणव्यापाररसनीयरूपो रसः।"[3]

रससरस्वत्याः मन्दिरे स्वर्णप्रदीप-प्रज्वलनं करोति रसशास्त्रस्य प्रथमः आलोचककर्ता भरतमुनिः।

अपि च अनेन महर्षिणा भरतेन प्रणीतं नाट्यशास्त्रमेव प्रचलितालङ्कारग्रन्थसमूहानां मध्ये प्राचीनग्रन्थः। यदा प्रायः द्विसहस्रवर्षपूर्वं पृथिव्याः अधिकांशदेशाः अज्ञानान्धकारेण निमज्जिताः अभवन् , तदा सुदूरप्राच्ये कृष्टि-ऐतिह्ययोः प्रतिनिधिरूपेण भरतमुनिः सारस्वतसाधनायै आत्मनियोगं करोति। तत्परं तेन सुवर्णवीणाध्वनेन सौन्दर्यश्रीः मुखरिता। भरतेन रचितं नाट्यशास्त्रमिति प्राचीन-रसतत्त्वविषयकम् पुस्तकम्। परन्तु भरतस्य रचनायाः पूर्वमपि केचन प्राच्यालङ्कारिकाः सारस्वतसाधनायै आत्मनियोगं कुर्वन्ति। परन्तु तेषां साधनायाः फलात् वयं वञ्चिताः स्मः। कारणं वर्तमाने तेषां ग्रन्थाः नाममात्रेण सीमाबद्धाः। राजशेखरेण तस्य काव्यमीमांसाग्रन्थे उल्लिखितम्– भगवान् श्रीकण्ठः ब्रह्मा-विष्णुप्रभृतिभ्यः ६४ जनेभ्यः शिष्येभ्यः काव्यशास्त्रमुपदिशति। पुनः परमेष्ठब्रह्मा तस्य अयोनिजपुत्रेभ्यः अर्थात् ऋषिभ्यः तां काव्यविद्यामुपदिशति। एतेषु सर्वश्रेष्ठः हि काव्यपुरुषः। एष काव्यपुरुषः १८ अधिकरणयुक्तकाव्यविद्यायाः विस्ताराय १८ जनेभ्यः शिष्येभ्य उपदिशति। ते शिष्याः प्रत्येकविषयस्योपरि पृथक् पृथक् ग्रन्थान् रचितवन्तः। यथा—

"तत्र कविरहस्यं सहस्राक्षःसम्नाम्नासीत्, औक्तिकम् उक्तिगर्भः , रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्राचेता, यमकं यमः, चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुवेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचमारः इति।"[4]

काव्यप्रकाशग्रन्थे उल्लिखतौ सुवर्णनाभ-कुचमारौ द्वौ आद्याचार्यौ कामसूत्रे प्राप्यते। नन्दिकेश्वरोऽपि रसशास्त्रस्य प्रवर्तकरूपेण प्रसिद्यते नन्दिकेश्वरेण रसशास्त्रस्योपरि यः ग्रन्थः रचितः तत्समये दुर्लभ आसीत्। अतः अभिनवगुप्तेन नाट्यशास्त्रस्य अभिनवभारतीभाष्ये उक्तम्– यद्यपि स नन्दिकेश्वरस्य ग्रन्थं न पश्यति, तथापि स कीर्तिधरस्य मतमुपस्थाप्य नन्दिकेश्वरस्य मतं प्रदर्शितवान्। यथा—

"यत् कीर्त्तिधरेण नन्दिकेश्वरमतमत्रागमित्वेन दर्शितं तदस्माभिः साक्षान्न दृष्टं तत् प्रत्ययात्तु लिख्यते संक्षेपतः। नन्दिकेश्वरमतानुसारेण अयं चित्रपुर्व्वरङ्गविधिः इति निबन्धः।।"[5]

शारदातनयेन भावप्रकाशग्रन्थे नन्दिकेश्वरस्य नाम उल्लिखितम्। अपि च उक्तम्, भरतः नन्दिकेश्वरात् नाट्यतत्त्वस्योपदेशं लभते। तस्य आदेशेन अभिनेत्रे अभिनयविद्यायाः शिक्षां प्रददाति। परन्तु अध्यापकेन मनोमोहनघोषेण सम्पादिते नन्दिकेश्वरस्य 'अभिनय-दर्पणम्'– इति ग्रन्थे नाट्यवेदस्य कथा बहुवारमुल्लिखितास्ति। अतः अभिनयदर्पणं न नाट्यशास्त्रात् प्राचीनतमम्। अतः रसशास्त्रस्य आदिप्रवक्ता हि भरतमुनिः। यस्य ग्रन्थः वर्तमाने सर्वहस्ते तिष्ठति। अपि च अन्यान्याङ्कारिकैः रसस्य आदिप्रवर्तकरूपेण स प्रतिष्ठीयते।

भरतस्य पूर्वमपि बहवः आलङ्कारिकाः रसतत्त्वस्य आलोचनायाम् आत्मनियोगं कुर्वन्ति। परन्तु तेषां कोऽपि ग्रन्थः न प्राप्यते। अतः भरत एव आदिरसस्य प्रवर्तकः। रसतत्तवस्य आलोचनायाः प्रथमो ग्रन्थो हि भरतस्य नाट्यशशास्त्रम्। तेन नाट्यशास्त्रस्य षष्ठाध्याये तथा सप्तमाध्याये रसभावयोः विस्तृता वर्णना कृता। भरतस्य सूत्रं हि रसतत्त्वस्य मूलसौधः। तद्धि–

"तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।"[6]

अर्थात्, विभाव-अनुभाव-व्यभिचारिसंयोगैः रसास्वादितं भवति। भरतेन मन्यते यत् , सर्वाणि वस्तूनि रसे पर्यवसितानि भूत्वा चित्तं चमत्कुर्वन्ति। अस्मिन् प्रसङ्गे नाट्यशास्त्रे विस्तृता वर्णना कृता।

नाट्यशास्त्रस्य सूत्रं हि रससौधस्य मूलभित्तिः। अस्मिन् प्रसङ्गे नाट्यशास्त्रस्य भाष्यरचयितृभिः भिन्नानि उक्तानि। भाष्यकाराणां मध्ये व्याख्याभेदस्य प्रथमकारणं हि सूत्रे स्थायिभावस्य अनुल्लेखः, द्वितीयकारणं हि संयोगे निष्पत्तिशब्दस्य च अर्थभेदः। एतेन मया चत्वारः वादाः उल्लिख्यन्ते। यथा– भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादश्च। व्याख्याभेदं यद्वा भवतु। तत्र रसविभागविषयेऽपि आलङ्कारिकीणां मध्ये मतविरोधो दृश्यते। यथा— कैश्चन अष्टौ रसाः मन्यन्ते, कैश्चन नव रसाः, कैश्चन दश रसाः मन्यन्ते इति।

**• हास्यरसविषये जयदेव-श्रीकेशवमिश्रयोः अभिमतम्–**

**जयदेवाचार्यस्य अभिमतम्—**

द्वादशशतकस्य विशिष्टालङ्कारिकेण जयदेवाचार्येण तस्य चन्द्रालोकग्रन्थस्य षष्ठमयूखे रसविषये आलोचितं कृतम्। नवरसेषु द्वितीयो रसो हि हास्यरसः। अतः तस्य मते हास्यरसविषयकः श्लोको हि-

"हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम्।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः।।"[7]

अर्थात्, हास्यरसस्य स्थायिभावो हि हासः। यत्र नायकः नायिका च आलम्बनविभावः। वैरूप्यादि पुरुषः हि उद्दीपनविभावः। फुल्लगण्ड-प्रभृतयः तु अनुभावाः। अवहित्था-निद्रा-आलस्य-प्रभृतयो हि सञ्चारिभावाः।

हास्यरसस्य स्थायिभावहासलक्षणे चन्द्रालोकस्य टीकाकारेण गागाभट्टेन उद्धृतम्–

"अङ्गक्रीडादिजन्मा चेतोविकारो हासः।"[8]

अर्थात्, अङ्गक्रीडादिना उत्पन्नः चित्तविकारो हि हासः।

**श्रीकेशवमिश्रस्य अभिमतम्—**

ममप्रबन्धे षोडशशतकस्य अपरैकालङ्कारिको हि श्रीकेशवमिश्रः। तस्य रचितः ग्रन्थः हि अलङ्कारशेखरः। तेन अस्य ग्रन्थस्य अष्टमरत्ने रसविषये आलोचना कृता। आदौ श्रृङ्गाररसमुक्त्वा तेन द्वितीये हास्यरसस्य कथा आलोचिता। यथा–

"हासमूलः समाख्यातो हास्यनामा रसो बुधैः।
चेष्टाङ्गवेषवैकृत्याद्वाच्यो हासस्य चोद्भवः।।
कपोलाक्षिकृतोल्लासो भिन्नोष्ठः स महात्मनाम्।
विदीर्णास्यश्च मध्यानामधमानां सशब्दकः।।"[9]

अर्थात्, हास्यरसस्य मूलस्थायिभावो हि हासः। आङ्गिकचेष्टया तथा वेषविकृत्या हासस्योत्पत्तिर्जायते। मानवसमाजे अयं हासः त्रिविधः। यथा– उत्तमश्रेण्याः हास्ये कपोलस्य नयनस्य च उल्लासः प्रकाशते, तथा द्वौ ओष्ठौ विस्तारितौ भवतः। मध्यमश्रेणीपुरुषस्य हास्ये सुखः विराजते। अधमश्रेणीपुरुषस्य हास्ये सशब्दो भवति।

अस्य हास्यरसस्य उदाहरणप्रसङ्गे तेन उक्तम् –

"नपुंसकमिति ज्ञात्वा प्रियायौ प्रेषितं मनः।
तत्तु तत्रैव रमते हताः पाणिनिना सशब्दकः।।"

अर्थात्, प्रियां निकषा मनः दूतरूपेण प्रेषयामि। कारणं पाणिनिः मनस्-शब्दं नपुंसकमिति

उक्तवान्। नारीं निकषा दूतरूपेण नपुंसकस्य प्रेषणं हि शास्त्रसम्मतम्। परन्तु पाणिनेः नपुंसकोपदेशः मम दमनस्य कारणं भवति। हे भ्राता! तन्मनः मम प्रियायाः मध्ये लीनं भवति पुरुषोचितार्थम्। अतः वक्तुं शक्यते यत्, मम मनः मां निकषा नास्ति, केवलं प्रियायाः मध्येऽस्ति।

अनन्तरं तेन स्थायिभावहासस्य स्वरूपं व्यक्तम्। यथा–

"अङ्गक्रीडादिभिश्चेतोविकारो हासः।"

अर्थात्, आङ्गिकचेष्टया यः चित्तविकारः उत्पद्यते, स हि हासः। अपि च तेन उक्तं हास्ये उपेन्द्रवज्रादि-कोमल-च्छन्दः उक्तमिति।

• **हास्यरसविचारः—**

द्वयोः आलङ्कारिकयोः हास्यरसविषये सादृश्यं वैसादृश्यं च उल्लिख्य वक्तुं शक्यते यत्, श्रीकेशवमिश्रेण हास्यरसविषयका कारिका अधिकग्रहणयोग्या। यद्यपि तेन अन्यमतस्य उल्लेखं कृत्वा कारिका उक्ता, तथापि तस्य प्रसिद्धिः सर्वत्र विराजते। आदौ तेन स्थायिभावहासस्य कथा व्यक्ता । अथ तेन उक्तं कथं हास्यरसः उत्पद्यते? अतः तेन निगदितम्। यथा–

"चेष्टाङ्गवेषवैकृत्याद्वाच्यो हासस्य चोद्भवः।"[10]

अर्थात्, आङ्गिकचेष्टया तथा वेषविकृत्या हासस्योत्पत्तिर्जायते। यथा भरताचार्येण नाट्यशास्त्रग्रन्थे अस्य रसोद्भवस्य कथापि व्यक्ता–

"विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः।।"11

अर्थात्, विपरीतालङ्कार-विकृताचरण-वेश-वचन-विकृतार्थैः हास्यरसः समुत्पद्यते।

धनञ्जयप्रमुखालङ्कारिकैरपि अस्य हास्यरसस्य उद्भवकथा व्यक्ता। यथा–

"विकृताकृतिवाग्वेषैरात्मनोऽथ परस्य वा।
हासः स्यात् परिपोषोऽस्य हास्यस्त्रिप्रकृतिः स्मृतः।।"[12]

ते केशवमिश्रस्य पूर्वाचार्याः आसन्। इदं तत्त्वं तेन पूर्वाचार्यमनुसृत्य उक्तम्। परन्तु इदं तत्त्वं जयदेवाचार्येण नोक्तम्। अतः मया मन्यते यत्, श्रीकेशवमिश्रः जयदेवाचार्यात् अधिकोत्कृष्टो भवति।

अपि च श्रीकेशवमिश्रेण हास्यरसस्य स्थायिभावहासलक्षणप्रसङ्गे उक्तम्–

"अङ्गक्रीडादिजन्मा चेतोविकारो हासः।"[13]

अर्थात्, अङ्गक्रीडादिना उत्पन्नः चित्तविकारो हि हासः। अस्य स्थायिभावस्य लक्षणप्रसङ्गे तस्य पूर्वाचार्यैः स्व स्व मतानि व्यक्तानि । यथा हासस्य लक्षणप्रसङ्गे भरताचार्येण उक्तम्–

"हासो नाम विनोदात्मको भावः स च परचेष्टानुकरणकुहकासम्बद्धप्रलाप-पौरोभाग्यमौर्ख्यादिभिर्विभावैः समुत्पद्यते। तमभिनयेत्पूर्वोक्तैर्हसितादिभिरनुभावैः।"[14]

अर्थात्, अनुकरण-मायावीचेष्टादि-प्रलाप-मूर्खतादैः विभावैः एषः हास्यरसः उत्पद्यते। अपि च हसिताद्यनुभावैः अस्य अभिनयः सम्भवेत्।

साहित्यदर्पणकारेण हास्यरसस्य स्थायिभावहासस्य लक्षणप्रसङ्गे उक्तम्–

"वागादिवैकृतैश्चेतोविकाशो हास इष्यते ।"[15]

अर्थात्, वागादिविकृतैः यः चित्तविकासो जायते स हि हासः।

श्रीकेशवमिश्रेण पूर्वाचार्यस्य मार्गम् अनुसृत्य पाठकानां बोधार्थं साहाय्यं कृतम्। परन्तु जयदेवाचार्येण अस्मिन् विषये किमपि वाक्यं न व्ययीकृतम्। अतः पाठकान् निकषा अयं विषयः काठिन्यं भजते। अपि च तेषां रसस्य तथा स्थायिभावस्य वैसादृश्यविषये समस्या जागरिता भवति। अतः मया वक्तुं शक्यते यत्, जयदेवाचार्यात् पाठककुलानां समीपे श्रीकेशवमिश्रस्य हासस्थायिभावलक्षणम् अधिकं श्रेयः समादृतञ्च।

अपि च श्रीकेशवमिश्रेण अस्य हासरसस्य बोधार्थम् आनन्दलाभार्थञ्च पाठककुलान् निकषा एकं सुन्दरमुदाहरणं दत्तम्। एतेन पाठकाः कथाछलेन इमं हास्यरसं जानन्ति। यः विषयः सुनिपुणालङ्कारिकाणां विशेषस्वरूपः। अपि च तस्य प्रायः पूर्वाचार्येणापि हास्यरसस्य उदाहरणं प्रदत्तम्। किन्तु तेषु पूर्वाचार्येषु व्यतिक्रमो हि जयदेवाचार्यः। अतः तन्मध्ये आलङ्कारिकाणां सर्वे गुणाः विद्यन्ते। श्रीकेशवमिश्रेण कारिकया तथा उदाहरणेन हास्यरसः उपस्थापितः। यः विषयः जयदेवाचार्यात् अधिकसरलतया तथा सहजतया व्यक्तः। अतः मन्यते यत्, लोकसमाजे स अधिकसमादृतो भविष्यति, तस्य ग्रहणयोग्यतापि सर्वजनग्राह्या भवति। अपि च तेन उक्तम् अन्यान्यालङ्कारिकेभ्यः पृथक्तया उक्तं हास्यरसस्य उपेन्द्रवज्रादि-कोमल-च्छन्दश्च दृश्यते। येन संस्कृतसाहित्यस्य कश्चन नवमार्गः सूच्यते।

पुनः मया एतत् वक्तुं शक्यते यत्, श्रीकेशवमिश्रस्य पूर्वाचार्येण जयदेवाचार्येण अतीवसहजतया, सरलतया, संक्षेपेण च हासरसः व्यक्तः। यः विषयः तेन स्वरचितः। अतः तस्य ग्रहणयोग्यतापि न अस्वीकरणीया। तेन केवलं एकेन श्लोकेन हास्यरसस्य तथा विभावादीनां विषयः उक्तः। यथा– नायक-नायिका च भवन्ति आलम्बनविभावाः, वैरूप्यादिपुरुषाः भवन्ति उद्दीपनविभावाः। फुल्लगण्डादयः हि अनुभावाः, आकारगोपन-निद्रा-आलस्यादयः तु सञ्चारीभावाः। तेन एकेन श्लोकेन अतीवसुन्दरतया इत्यादयः विषयाः उपस्थापिताः। एतेन पाठकैः अल्पश्रमेण हास्यरसः बोध्यते। परन्तु अस्मिन् विषये श्रीकेशवमिश्रेण अन्यस्य मतस्य उल्लेखं कृत्वापि निरवः स्थितः। जयदेवाचार्यस्य तुल्यः हास्यरसस्य विभावादिप्रसङ्गे अन्यान्यालङ्कारिकैरपि उक्तम्। यथा– भरताचार्येण निगदितम्–

"स च विकृतपरवेषालङ्कारधार्ष्ट्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शनदोषोदाहरणादिभिः विभावैरुत्पद्यते। तस्य ओष्ठनासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिः अनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्च आस्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रवोधासूयादयः।"[16]

अर्थात्, असत्प्रलाप-विकलाङ्गदर्शन-दोषाख्यापनप्रभृतैः विभावैः अयं हास्यरसः उत्पद्यते। अपि च अस्य अभिनयः भूयते ओष्ठ-नासिका-कपोलस्पन्दन-नेत्रविस्तार-घर्म-प्रभृतैः अनुभावैः। अस्य व्यभिचारिभावाः खलु आलस्य-तन्द्रा-निद्रा-स्वप्न-असूया-प्रभृतयः।

अपि च सरस्वतीकण्ठाभरणस्य रचयित्रा भोजराजेण उक्तम् अस्य रसस्य आलम्बनादिविषये—

"इदमम्लायमानाया लग्नं स्तनतटे तव।
छाद्यतामुत्तरूयेण नवं नखपदं सखि!।।

अत्र काञ्चित् सखीं पूर्वं भर्त्तरि प्रगृहीतमानां तेनैव नवनखपदाङ्कितस्तनीम् आलम्बनविभावभूताम् उपलभमानायाः कस्याश्चित् सख्या उत्पन्नो हासस्थायिभावः तदीयमानपरिग्रहस्मरणादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमितेषु शङ्कावहित्थगद्गदादिव्यभिचारिषु निष्पाद्यमानो हास्यशब्देन अभिधीयते।।"[17]

साहित्यदर्पणकारेणापि हास्यरसस्य विभावादिप्रसङ्गे उक्तम। यथा –

"विकृताकार वाक्चेष्टं यमालोक्य हसेज्जनः।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्।।
अनुभावोऽक्षिसंकोच वदनम्मेरतादयः।
निद्रालस्यावहित्थाद्य अत्र स्युर्व्यभिचारिणः।।"[18]

अर्थात्, अस्य हास्यरसस्य आलम्बनविभावः खलु यं दृष्ट्वा लोकाः हसन्ति स। तस्य चेष्टादयः तु उद्दीपनविभावाः। चक्षुसङ्कोचन-हास्यवदनप्रभृतयो हि अनुभावाः। निद्रा-आलस्य-अवहित्था -प्रभृतयो भवन्ति सञ्चारिभावाः। किन्तु श्रीकेशवमिश्रेण कथं हास्यरसविभावादिविषये निरवः स्थितः तद्विचारस्य विषयः। अतः मया वक्तुं शक्यते यत्, जयदेवाचार्येण तस्य स्वकीयता तथा रसविभावपरम्परायाः अनुसरणं कृतम्। एतेन बोध्यते यत्, तस्य मतस्य ग्रहणयोग्यतासीत्। अतः अस्माभिः प्रत्यकैः जयदेवाचार्यस्य हास्यरसविषयकः श्लोकः पठनीयः। परिशेषे मया दृश्यते यत्, अस्माकम् आलोच्यौ द्वौ आलङ्कारिकौ हास्यरसस्य वर्णविषये तथा देवताविषये न उक्तवन्तौ। कथं तेन निरवः स्थितः अस्माभिः प्रत्येकैः चिन्तनीयः विषयः। परन्तु अन्यान्यालङ्कारिकैः तद्विषये उक्तम्। यथा– भरताचार्यस्य मते—

"सितो हास्यः प्रकीर्त्तितः।"[19] अर्थात् हास्यरसस्य वर्णो हि शुभ्रः। अपि च हास्यरस्य देवता तु महेन्द्रदेवः। यथा– "हास्यः प्रमथदैवतः।"[20]

अस्मिन् प्रसङ्गे विश्वनाथेन कविराजेन निगदितम्- "हास्यो हास-स्थायिभावः श्वेतः प्रमथदैवत।"[21]

अपि च आलोच्येषु आलङ्करिकेषु केवलं हास्यरसभेदस्य कथा उक्ता श्रीकेशवमिश्रेण। यथा—

कपोलाक्षिकृतोल्लासो भिन्नोष्ठः स महात्मनाम्।
विदीर्णास्यश्च मध्यानामधमानां सशब्दकः।।"[22]

अर्थात्, एषः हासः त्रिविधः। यथा— उत्तमश्रेण्याः हास्ये कपोलस्य तथा नयनस्य उल्लासः प्रकाशते, तथा द्वौ ओष्ठौ विस्तारितौ भवतः। मध्यमश्रेणीपुरुषस्य हास्ये सुखः विराजते। अधमश्रेणीपुरुषस्य हास्ये सशब्दो भवति। अतः तिसृणां श्रेणीनां मध्ये षड्भेदाः तिष्टन्ति। एतेन पाठकाः सहजतया बोध्यन्ते। एषः मार्गः तेन पूर्वाचार्यस्यानुसृत्य। अतः अस्य रसस्य भेदविषये अन्यान्यालङ्कारिकाः उक्तवन्तः। यथा– भरताचार्यस्य मते हास्यरसः षड्विधः। यथा– स्मितम्, हसितम्, विहसितम्, उपहसितम्, अपहसितम्, अतिहसितञ्च। तेषु द्वौ उत्तममध्यमाधमानां दृश्यन्ते। अतः तेन व्यक्तम्–

"षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः।।
स्मितमथ हसितं विहसितमुपहितं चापहसितमतिहसितम्।
द्वौ द्वौ भेदौ स्यातामुत्तमममध्याधमप्रकृतौ।।
तत्र स्मितहसिते ज्येष्ठानां मध्यानां विहसितोपहसिते च।
अधमानामपसितं ह्यतिहसितं चापि विज्ञेयम्।।"[23]

दशरूपककारधनञ्जयेनापि उत्तमभेदेन, मध्यमभेदेन,अधमभेदेन,चापि हास्यरसः त्रिविधः उक्तः। पुनः अत्र प्रत्येकश्रेण्यां द्वे द्वे हास्ये विद्येते। यथा–

"स चोत्तमध्यमाधमप्रकृतिः षड्विध।"[24]

अपि च साहित्यदर्पणकारेण अयं हास्यरसः षड्विधः उक्तः। अतः तेन उक्तम्–

"ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।
नीचानामपहसितं तथातिहसितं तदेष षड् भेदः।।"[25]

परन्तु कथं जयदेवाचार्येण अस्मिन् विषये निरवः स्थितः, एषः विचार्यः विषय।

अतः वक्तुं शक्यते यत्, मदालच्यौ द्वौ आलङ्कारिकौ रसविषये यद् यदुक्तवन्तौ तदतिरिक्तमपि अन्येषाम् आलङ्कारिकाणां ग्रन्थेषु प्राप्यते।

**उपसंहारः—**

संस्कृतालङ्कारसाहित्येतिहासे नवरसेषु अन्यतमो रसो हि हास्यरसः। यस्य चर्चा प्रायः सर्वै आलङ्कारिकैः कृता। यद्यपि सर्वान् रसान् आस्वादनेन मानसिकानन्दलाभो जायते, परन्तु केवलं हास्यरसेन शारीरिकः तथा मानसिकानन्दलाभो उत्पद्यते। यथा विदूषकादि। तस्य वाक्येन तथा शरीरेण हास्यरसो जायते। अतः हास्यरसस्य प्रयोजनीयता संस्कृतसाहित्ये अनस्वीकार्या। मदालोच्यौ द्वौ आलङ्कारिकौ अस्य रसस्य विषये विस्तृता व्याख्या कृता। अत्र द्वयोः आलङ्कारिकयोर्मध्ये कस्य प्राधान्यमस्ति? तथा किमर्थम् अस्य ग्रहणयोग्यता?— इति विषये आलोचना जाता। अतः हास्यरसस्य गुरुत्वप्रसङ्गे अभिनवगुप्तेन निगदितम्—

"परकीयहासावलोकेन तत्क्षणं हासविशेषः सम्पद्यत एवेति स्वभावः। यथा अम्लदाडिमादिरसास्वादः संक्रमणस्वभावोऽन्यत्रापि दन्तोदकविकारानुरूपसंक्रमदर्शनादेव संक्रामति एवं हासः स्वभावतः संक्रमणशील इति भूयिष्ठता काष्ठा।"[26]

## Endnotes

1. नाट्यशास्त्रम्- ६/३८
2. तैत्तिरी.उप- ७ अनुवाकः
3. काव्यप्रकाशः , पत्राङ्कः १७९
4. काव्यमीमांसा , पत्राङ्कः ३
5. रससमीक्षा , पत्राङ्कः १४
6. नाट्यशास्त्रम् , पत्राङ्कः ६५
7. चन्द्रालोकः, पृ. २०६
8. चन्द्रालोकः, पृ. ११९
9. अलङ्कारशेखरः- ८.१७-१८
10. अलङ्कारशेखरः, पृ.२३५
11. अलङ्कारशेखरः- ६.४९
12. दशरूपकम्, पृ. ४२७
13. अलङ्कारशेखरः ̧पृ.२४४
14. नाट्यशास्त्रम्, पृ.२८३
15. साहित्यदर्पणम्, पृ. १४६
16. नाट्यशास्त्रम्, पृ.१४५
17. सरस्वतीकण्ठाभरणम्, पृ.४२१
18. साहित्यदर्पणम्, पृ.१६३
19. नाट्यशास्त्रम्, पृ.१२२
20. नाट्यशास्त्रम्, पृ.१२२
21. साहित्यदर्पणम्, पृ.१६३
22. अलङ्कारशेखरः, पृ.२३५
23. नाट्यशास्त्रम्, पृ.१४८
24. दशरूपकम्, पृ. ४२७
25. साहित्यदर्पणम्, पृ.१६३
26. नाट्यशास्त्रम्, पृ. १४९

## Bibliography


- जयदेवः। *चन्द्रालोकः*। सम्पा. ड. त्रीलोकीनाथद्विवेदी। दिल्ली : भारतीयविद्याप्रकाशनम्, २०१० (संस्करणम्)।
- पीयूषवर्षजयदेवाचार्यः। *चन्द्रालोकः*। सम्पा. ललनमिश्रः। वाराणसी : चौखम्बा-ओरियन्टालिया, २०२१, (संस्करणम्)।
- मम्मटाचार्यः। *काव्यप्रकाशः*। सम्पा. ड. विपदभञ्जनपालः। कलिकाता : संस्कृतपुस्तकभाण्डारः , १४२४ बङ्गाब्दः, (द्वितीयप्रकाशः)।
- मम्मटाचार्यः। *काव्यप्रकाशः*। सम्पा. सुनिलकुमार-जाना। कलकाता : संस्कृतवुकडिपो, २०२१, (प्रथमप्रकाशः)।
- मम्मटः। *काव्यप्रकाशः*। सम्पा. पं.सत्यनारायणशास्त्री-खण्डूडी। वाराणसी : चौखम्बाकृष्णदासअकादमी,

२०१६, (द्वितीयसंस्करणम्)।

- श्रीकेशवमिश्रः। *अलङ्कारशेखर एक अध्ययन*। सम्पा. डाँ.पुनम- लखनपालः। नई दिल्ली : विश्वभारतीपाब्लिकेन्स, २००९, (प्रथमसंस्करणम्)।
- श्रीकेशवमिश्रः। *अलङ्कारशेखरः*। सम्पा. डाँ.शशिनाथ- झा। दिल्ली : नाग प्रकाशन, २०१८, (प्रथमसंस्करणम्)।
- भरताचार्यः। *नाट्यशास्त्रम्*। सम्पा. ड.अञ्जलिका- मुख्योपाध्यायः। कलकाता : संस्कृत पुस्तक भाण्डार , २०१८ ।
- विश्वनाथः। *साहित्यदर्पणः।* सम्पा. ड.विमलाकान्तमुख्योपाध्यायः। कलकाता : संस्कृत पुस्तक भाण्डार , २०१३।
- धनञ्जयः। *दशरूपकम्* । सम्पा. ड.सीतानाथाचार्यशास्त्री अपि च देवकुमारदासः। कलकाता : संस्कृत पुस्तक भाण्डार, २०१६ ।
- भोजराजः। *सरस्वतीकण्ठाभरणम्* । सम्पा. ड.कामेश्वरनाथमिश्रः। दिल्ली : चौखम्भा ओरियन्टालिया , १९९२।

——